International Journal of Sanskrit Research 2023; 9(3): 220-225

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 220-225
© 2023 IJSR
www.anantaajournal.com
Received: 10-03-2023
Accepted: 13-04-2023

**नयनमणि रायः**
गवेषकः, संस्कृतविभागः,
वर्धमानविश्वविद्यालयः,
वर्धमानः,पश्चिमवङ्गाः,
भारत

**Corresponding Author:**
**नयनमणि रायः**
गवेषकः, संस्कृतविभागः,
वर्धमानविश्वविद्यालयः,
वर्धमानः,पश्चिमवङ्गाः,
भारत

# मैत्रायणी-संहिता : एका समीक्षा

## नयनमणि रायः

### सारांश
धर्माचरणस्य मूलं हि वेदः। शास्त्राणां मध्ये प्राचीनतमग्रन्थः खलु वेदः। मन्त्र-ब्राह्मणभेदेन विभागद्वयं प्राप्यते। मन्त्रः खलु संहिता। चतस्रः संहिताः प्राप्यन्ते। यज्ञप्रधाना यजुर्वेदसंहिता खलु अन्यतमा। यजुर्वेदस्य शुक्लकृष्णभेदेन विभागद्वयम् प्राप्यते। कृष्णयजुर्वेदस्य अन्यतमा शाखा मैत्रायणीसंहिता अत्र आलोच्यते। अस्याः शाखायाः विभागाः, वासस्थानानि, ऋषिः, पाण्डुलिपिः, पाणिनिसूत्रे अस्याः शाखायाः शब्दाः पदा वा, स्वरचिह्नानि संक्षेपेन आलोच्यन्ते अस्मिन् प्रबन्धे।

**कूटशब्द :** चरकः, पाण्डुलिपिः, स्वरः, पाणिनिः, चरणव्यूहः

### प्रस्तावना
भारतीयसारस्वत्-ऐतिह्यस्य प्राचीनतमो धारकः खलु वेदग्रन्थः। बहिर्विश्वस्य सभ्यतायां, संस्कृतौ, साहित्ये वेदः खलु उज्ज्वलज्योतिष्कः। वेदमध्ये प्राप्यते समग्रभारतवर्षम्। सायणाचार्येण ऋग्वेदभाष्यभूमिकायां वेदस्य वेदत्वज्ञापनाय श्लोकोऽयम् उल्लिखितः –

‘प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।’ इति

भारतवासिनाम् धर्म, कर्म, आचारं व्यवहारं सर्वविषयस्य उत्सः खलु वेदः। मनुना उक्तम्- वेदोऽखिलो धर्ममूलम्(मनुसं-2/6) अर्थात् समग्रवेदः धर्मस्य मूलम्। वेदशब्दः खलु √विद् धातोरुत्तरं घञ्/अच् प्रत्यययोगेन सिद्धति।मन्त्रांशो ब्राह्मणांशः खलु वेदः, सायणाचार्येण उक्तम् – मन्त्रब्राह्मणात्मक-शब्दराशिर्वेदः।

ब्राह्मणस्य भागत्रयम् अस्ति, शुद्धब्राह्मणम् आरण्यकम् उपनिषत् च। संहिताभागऽत्र मन्त्रः,अर्थात् ऋक् साम् यजुः अथर्व एते चतस्रः संहिताः। अस्माकं आलोच्यविषयः खलु यजुर्वेदः। शुक्लकृष्णभेदेन विभागद्वयम् अस्ति यजुर्वेदस्य। अस्मिन् विभागसम्पर्के एकम् उपाख्यानं वायु-विष्णु-ब्रह्माण्डपुराणेषु प्राप्यन्ते। अधुना आलोच्यते यजुर्वेदः। कृष्णशुक्लभेदेन दृश्यते भादद्वयं यजुर्वेदस्य। कृष्णयजुर्वेदस्य कतिपया विभागाः सन्ति।यथा-तैत्तिरीयः,काठकः,कपिष्ठल-कठः,मैत्रायणी प्रभृतयः। केवलं कृष्णयजुर्वेदस्य मैत्रायणीसंहिता खलु अत्र आलोच्यविषयः।

**शाखाविभागः**

वेदव्यासमुनेः वैशम्पायनो यजुर्वेदशिक्षा प्राप्यते। वैशम्पायन एव यजुर्वेदस्य प्रवर्तकः, येन यजुर्वेदस्य षडशीतिसंहिता प्रणीता।[1] कृष्णयजुर्वेदस्य प्रवर्तको वैशम्पायनः। परापि वैशम्पायनस्य शिष्यो याज्ञवल्क्यः खलु शुक्लयजुर्वेदस्य प्रवर्तकः। वैशम्पायनस्य अपरो नाम खलु चरकः, एवं शिष्याणां 'चरकाध्वर्युः' इति आख्यायते।[2] शौनकीयचरणव्यूहे प्राप्यन्ते चरकाणां द्वादशभेदाः। यथाः चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाः चारायणीया वारायणीया वार्त्तान्तवेया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रयणीयश्चेति।[3] सातवलेकरमहोदयेन मैत्रायणीसंहिताया भूमिकांशे उक्तं, कठा द्वादश- चरकाः, आह्वारकाः, भ्राजिष्ठलकठाः, प्राच्यकठाः, कपिष्ठलकठाः, वारायणीयाः, चारायणीयाः, श्वेताः, श्वेताश्वतराः, औपमन्यवाः, पाताण्डिनेयाः, मैत्रायणीयाः, इति चरणव्यूहे।[4] पुनः मैत्रायणीयशाखायाः षड् भेदाः प्राप्यन्ते, यथा – मानवा वाराहा दुन्दुभाः छागलेया हारिद्रवेयाः श्यामायणीया श्चेति।[5] किन्तु सातवलेकरमहोदयेन मैत्रायणीयसंहिताया भूमिकांशे उक्तम्- मैत्रायणीयाः सप्त- 1. मानवाः 2. वाराहाः 3. दुन्दुभाः 4. ऐकेयाः 5. हारिद्रवीयाः 6. श्यामाः 7. श्यामायणीयाः, इति चरणव्यूहे एव। तत्रापि हारिद्रवीयाः पञ्च- 1. आसुरिणः 2. गार्ग्याः 3. शार्कराक्ष्याः 4. मार्गाः 5. वासवीयाः, इति चरणव्यूहे एव।[6] Jon Gonda महोदयेन कृष्णयजुर्वेदस्य एते सर्वे विभागा न प्रदीयन्ते।तेनैव उक्तम्- 'However, what has survived has crystallized in three groups, that of the Carakas, usually called Kathas, that of the Maitrayaniyas and that of the Taittiriyas.Asto the first, there are Kathas proper and the Kapisthala(Kathas); there have also been other affiliated branches. Among the Maitrayaniyas there were Manavas, Varahas and others; to the Taittiriyas belonged among others, the Aukheyas and the Khandikiyas.।[7]

**मैत्रायणीसंहिताया विस्तारः**

अधुना मैत्रायणीसंहिता सम्पर्के आलोचना उपस्थाप्यते। सर्वप्रथमे मैत्रायणी शब्दस्य व्युत्पत्तिः प्रदर्शिता जाता।

मित्र+अन् = मैत्र[8]

मैत्र+फक्[9]

मैत्र+आयन = मैत्रायन[10] । अत्र 'न' इति स्थाने 'ण' भवति, यथा- मैत्रायण[11]

मात्रायण+ङीष् = मैत्रायणी[12]

भगवद्दत्तेन च मैत्रायणीशाखाया ऋषिः 'मैत्रायणी' इति मन्यते।[13] सातवलेकरमहोदयेन उक्तं मैत्रेयेन श्रुतर्षिणा प्रवर्तिता संहिता मैत्रायणीसंहिता।[14] उत्तरपाञ्चालवंशे दिवोदासो नाम एको राजा आसीत्। तस्य पुत्रो महाराजो मित्रयुः, मित्रयोः पुत्रो मैत्रायणः। हरिवंशे मैत्रायणस्य वंशो मैत्रेय इति कथ्यते।

"अत ऊर्द्ध्वं प्रवक्ष्यामि दिवोदासस्य सन्ततिम्
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः।
मैत्रायणी ततः शाखा मात्रेयास्तु ततः स्मृताः"।[15]

मैत्रायणीशाखा वर्तमानसमये खानदेशे (वर्तमाने महाराष्ट्रस्य जलगाओ जिला), नासिके, मोर्वी(गुजराटः) नामके स्थाने पठ्यते। अस्या शाखाया वासस्थानसम्पर्के महार्णवे उक्त एकः श्लोकः प्राप्यते –

'मयूरपर्वताच्चैव यावद्गुर्जरदेशतः
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता'।।[16]

Keith महोदयेन उक्तम् – 'Kaṭha-Kapiṣṭhala school was spread in kaśmīr and the Punjab,the Maitrāyaṇīyasin the Gujerat territory and the land

north of the Narmadā, the Taittirīyas were widespread in the south, whence both Āpastamba and Baudhayāna came, and the Vajasaneyins covered the north-east and east.'।[17]

## पाण्डुलिपिः

वर्तमाने मैत्रायणीसंहितायाः पदपाठस्य पाण्डुलिपित्रयं प्राप्यते तथा च कर्मपाठस्य एका पाण्डुलिपिः अस्ति, इदमेव ज्ञायते Maitrāyaṇī padapāṭha : a study ग्रन्थात्। अत्र उक्तञ्च-

Three manuscripts (Mss) of the padapāṭha (Pp) and one of the Karmapāṭha are available to us.
Manuscript A – Bhandarkar Oriental Research Institute, Pune.
Manuscript B – Vaidika Samshodhan Mandala, Pune(collected from Nasik and Bhadgaon).
Manuscript C – Vaidika samshodhan Mandala, Pune (collected from Nasik and Bhadgaon).
Karmapāṭha Manuscript – Vaidika Samshodhan Mandala, Pune (collected from Nasik).

## मैत्रायणीसंहिता पाणिनिः च

मैत्रायणीसंहिता जनानां मध्ये प्रचलितासीत्। पाणिनिना मैत्रायणीसंहितासम्पर्के सम्यग्रूपेण ज्ञायते। अस्यां शाखायां प्रयोजनीयशब्दाः शब्दरूपा यथायथरूपेण विविच्यन्ते तस्य सूत्रसमूहे। यथा- पाणिनिना 3.1.42 संख्यके सूत्रे षट् पदानि उल्लिख्यन्ते, अभ्युत्सादयामकः, प्रजनयामकः, चिकयामकः, रमयामकः, पावयांक्रियात्, विद्यमक्रन्। मैत्रायणीसंहितायां त्रयमेव प्राप्यते। अभ्युत्सादयामकः(मै.सं 1.6.5), प्रजनयामकः(1.8.5), पावयांक्रियात्(2.1.3)। पुनः विद्यमक्रन् पदमेव मैत्रायणीसंहितायां तैत्तिरीयब्राह्मणे च प्राप्यते।[18] 4.1.30 संख्यके सूत्रे शब्दस्य स्त्रीलिङ्गे ङीप् इति विधानं क्रियते। अत्र आर्यकृतशब्दस्य उत्तरं स्त्रीलिङ्गे ङीप् अति प्रत्यययोगे वेदे आर्यकृती भवति। लौकिके आर्यकृता भवति। आर्यकृतीशब्दः मैत्रायणीसंहितायां दृश्यते। असूर्यशब्दः प्राप्यते मैत्रायणीसंहितायाम् 1.8.3 , 3.6.6 । 'असुरस्य स्वम्'[19] इति पाणिनिसूत्रेण षष्ठीयुक्तस्य असुरशब्दस्य उत्तरं यत् प्रत्यययोगेन असूर्यशब्द उत्पन्नो भवति। असुरस्य स्वम् इति सूत्रव्याख्याने काशिकाकारेण मैत्रायणीसंहिताया मन्त्र उल्लिख्यते- असूर्यं वा एतत् पात्रं यत्। असूर्यशब्दः काठकसंहितायामेव प्राप्यते।[20]

## स्वराः स्वरचिह्नानि च

मैत्रायणीसंहितायां स्वरचिह्नप्रदानं विशेषरूपेण प्राप्यते। अस्यां संहितायाम् उदात्तस्य चिह्नम् उल्लम्बम् '।' (vertical line)। ऋग्वेदसंहितायां चिह्नमिदं स्वरितस्य चिह्नम्। मैत्रायणीसंहितायाम् अनुदात्तस्य चिह्नं खलु आनुभूमिकम् ' ' '(Horizontal line)। स्वरितस्वरस्य परवर्ती अनुदात्तस्वरः प्रचयः,यस्य चिह्नं नास्ति एवं योऽनुदात्तोऽक्षर उदात्तम् अनुसरति स खलु स्वरितस्वरः। अस्य चिह्नम् अक्षरस्य निम्नदेशे प्रदीयते यथा- ' ˍ ' । एवं स्वरितस्य अपरचिह्नानि क्रमेण अलोच्यन्ते। उदाहरणानि यथा-

उदात्तः – य॑स्या रा॑त्र्याः[21]

अनुदात्तः – इ॒षे॑ प्रा॑र्पयतु , सवि॒तः[22]

स्वरितः – प्र॒जा॑पति , द॑क्षपित॒र॒स्ते॑[23]

प्रचयः – लो॒क॑ं मे लोककृतो कृणु॒तं मा॑[24]

Schroeder महोदयस्य संस्करणे उदात्तस्य स्वरस्य चिह्नं दृश्यते, पूर्वम् आलोचितस्य स्वरचतुष्टयस्य चिह्नानि दृश्यन्ते Satavalekar महोदयस्य संस्करणे। यदि जात्यस्वरितं साधारणस्वरितञ्च द्वयमेव सन्धिमाध्यमेन उत्पन्नं जातं, तर्हि स्वरिताक्षरस्य निम्ने वक्ररूपेण एकं चिह्नं प्रदीयते। Satavalekar महोदयस्य संस्करणे अर्धचन्द्राकारचिह्नं '˘' दृश्यते। Schroeder महोदयस्य संस्करणे 'c' इदमेव चिह्नं दृश्यते। स्वरितद्वयम् अनुदात्तम् अनुसरति, उदाहरणं यथा-

जात्यस्वरितः

वीर्य॒ण, मनु॒ष्य॒स्य[25]

साधारणस्वरितः
ग्रामण्यो॒ व्रतेन , मित्रो॒ऽसि [26]

पुनः यदि जात्यस्वरितं साधारणस्वरितं वा सन्धिमाध्यमेन उत्पन्नं भूत्वा उदात्तम् अनुसरति तर्हि स्वरितस्य निम्ने '– ' (horizontal line) चिह्नं , एवं स्वरितस्य पूर्वे ' ३ '(no-3)संख्या इति प्रदीयते। यथा –

वी३र्यं तंत्
प्र॒स३वेऽश्विनो॒
म॒नु३ष्या नक्तम्[27]

Schroeder महोदयस्य संस्करणे स्वरितस्वरस्य पूर्वे '३' (no-3) चिह्नं अस्ति, केवलं स्वरितस्य निम्ने ' - ' चिह्नं नास्ति।
अपर एकः स्वरितः दृश्यते, यत्र स्वरितस्वरस्योपरि रेखात्रयं '।।।' स्वरितचिह्नरूपेण प्रदीयते। इदं चिह्नं Schroeder महोदयस्य संस्करणे नास्ति, किन्तु मैत्रायणीसंहितायाः पदपाठस्य (Manuscript-A) मध्ये कदापि दृश्यते चिह्नमिदम्।[28] किन्तु Satavalekar महोदयस्य संस्करणे अस्य स्वरितस्य निम्ने ' ‿ ' (similar English word 'w') इदमेव चिह्नं व्यवह्रियते। यथा–

द्यौरसि जन्मना
माता च पिता[29]

T.N.Dharmadhikari महोदयेन अस्य स्वरितस्य 'Short Secondary Svarita' इति नामकरणं क्रियते।यः स्वरितः अनुदात्तम् अनुसरति, पुन उदात्तम् अनुसरति। तेन नवरूपेण स्वरितस्य एकं चिह्नम् आलोच्यते, यदा अयं स्वरितो दीर्घो भवति तदा अस्य चिह्नं खलु अक्षरस्य मध्ये एका आनुभूमिकरेखा।[30] यथा –

विश्वो दे॒वस्य ने॒तु[31]

किन्तु Satavalekar महोदयस्य संस्करणे अस्य दीर्घस्वरितस्य चिह्नम् ' _ ' इदमेव दृश्यते, यथा –

विश्वो॒ दे॒वस्य॒ ने॒तु

**संहिताभागस्य विषयः**
मैत्रायणीसंहितायां चत्वारः काण्डाः, 54 संख्यकाः प्रपाठका एवं 653 संख्यकाः अनुवाका उपलभ्यन्ते। मैत्रायणीसंहिताया वर्तमानसंस्करणे ये आचाराः क्रियाकलापा वा सन्ति ते निम्ने प्रदर्शिताः।

मन्त्रांशः ब्राह्मणांशः
दर्शपूर्णमासयज्ञः 1/1 4/1
अग्निष्टोमः
1.अध्वरपर्व 1/2 3/6-10
2.ग्रहपर्व 1/3 4/5-8
यजमानसम्वन्धीयकार्यम्
1.पवमानाष्टिः 1/4/1-4 1/4/5-15
पवमानाष्टिः 1/4/1-4 1/4/5-15
अग्न्युपस्थानपर्व 1/5/1-4 1/5/5-12
अग्न्याधानपर्व 1/6/1-2 1/6/3-13
पुनराधानपर्व 1/7/1 1/7/2-5
अग्निहोत्रः **?** 1/8
चतुहोतारः 1/9/1-2 1/9/3-8
चातुर्मास्यानि 1/10/1-4 1/10/5-20
वाजपेयः 1/11/1-4 1/11/5-9
काम्येष्टिः ? 2/1-4
काम्यपशुः ? 2/5
राजसूययज्ञः 2/6/3, 6-12 2/6/1-6, 13 4/3-4
अग्निचितिः 2/7-13 3/1-5
सौत्रामणी 3/11
अश्वमेधः 3/12-16
प्रवर्गः 4/9
याज्यानुवाक्या 4/10-14
गोनामिकयज्ञस्य मन्त्रव्राह्मणमिश्रितरूपेण प्राप्यते 4/2 विभागे।

यज्ञप्रधानमैत्रायणी-संहितायां वहवो यज्ञा आलोच्यन्ते, यथा – अग्निहोत्रः, दर्शपूर्णमासः, चातुर्मास्यम् अध्वरः, अग्न्याधानम्, अग्नुपस्थापनम्, पुनराधानम्, राजसूयः, वाजपेयः, अश्वमेधः, सौत्रामणी, प्रवर्ग्यः, गोनामिकः, अग्निचितिः।

**उपसंहारः**

मैत्रायणीसंहितायाः संस्करणद्वयं प्राप्यते, Schroeder महोदयस्य संस्करणं Satavalekar महोदयस्य संस्करणम्। किन्तु अस्य व्याख्या , टीका न प्राप्यते, केनापि अस्याः संहिताया भाष्यं न क्रियते। वर्तमाने प्रद्योतकुमारदत्तमहोदयेन एको वङ्गानुवादः क्रियते। अनेन कारणेन अस्याः संहिताया मन्त्रस्य अर्थविचारे अतीवकष्टम् अनुभवति। किन्तु संहिताया विषयानुक्रमा यदि मनोयोगसहकारेण पठ्यन्ते तर्हि आत्मानुभूतिः भवति। अस्याः संहिताया यज्ञानुक्रमाः मनोरमाः, किन्तु संहितापरेण सह पार्थक्यमपि प्राप्यते। संहितांभागमध्ये पृथग्रूपेण ब्राह्मणांशः प्राप्यते, अस्मिन् कारणेन मन्त्रांशः पृथग्रूपेण प्राप्यते। अस्यां समीक्षायाम् अतिसंक्षिप्तरूपेण समग्रसंहिताया एका धारणा उपस्थाप्यते।

**सन्दर्भ**


1. वैशम्पायनगोत्रोऽसौ यजुर्व्वेदं व्यकल्पयत्। षडशीतस्तु येनोक्ताः संहिता यजुषां शुभाः।। वायुपुराणम्-61.5 / ब्रह्माण्डपुराणम्-67.5
2. वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् , भागवतपुराणम्- 12.6.61
3. शौनकीयम् चरणव्यूहसूत्रम्, यजुर्वेदखण्डः
4. सातवलेकरकृतः मैत्रायणीसंहितायाः भूमिकांशः, page-8-9
5. शौनकीयचरणव्यूहसूत्रम्,यजुर्वेदखण्डः
6. सातवलेकरकृतः मैत्रायणीसंहितायाः भूमिकांशः, page-9
7. A History of Indian Literature (vedic literature), vol 1, Fasc 1
8. अचोञ् णिति, अष्टाध्यायी- 7.2.115
9. नडादिभ्यः फक्, अष्टा.- 4.1.99
10. आयन्-एय्-ईन्-ईय्-इयः फ-ढ-ख-छ-घां प्रत्ययादीनाम्, अष्टा.- 7.1.2
11. रसाभ्यां नो णः समानपदे, अष्टा.- 8.4.1
12. षिद्-गौरादिभ्यश्च, अष्टा.- 4.1.41
13. वैदिक वाङ्मय का इतिहास(प्रथमखण्डः) p-.232
14. मै.संहितायाः भूमिकांशः p-.12
15. ह.वं( हरिवंशपर्व) 32/36-37
16. शौनकस्य चरणव्यूहः P.34
17. Introduction of Taittiriya Samhita(translated by Keith) p. Xcii
18. मै.सं 10407 , तै.ब्रा 1.3.10
19. अष्टाध्यायी 4.4.123
20. काठकसंहिता 1.3.4
21. मै .सं. 1.6.12
22. तदेव1.11.1
23. तदेव1.8.1, 1.2.3
24. तदेव1.1.13
25. तदेव 1.2.9, 1.4.7
26. तदेव 1.6.2, 2.6.9
27. Ibid 2.4.3, 1.1.9, 2.3.6
28. However, it is noticed in the Pp Ms A rarely. – Maitrāyaṇī Padapāṭha A Study by Dr. Bhagyashree Shreeram Bhagwat, p.12
29. मै.संहिता 1.1.12, 1.6.4
30. The Maitrāyaṇī Saṃāhitā : Its Ritual and Language by T.N.Dharmadhikari p.614
31. मै.संहिता 1.2.2.
32. Caraṇavyūhasūtra of Śaunaka. with the commentary of Mahidāsa,ed. Pt. Anantaram Dogara Sastri, The Chowkhamba Sanskrit Series Office, Benares City; c1938.
33. Dharmadhikari TN. The Maitrāyaṇī Saṁhitā Its Ritual and Language. Vaidika Samsodhana Mandala, Pune; c2008.
34. Gonda, Jon. AHistory of Indian Literature (Vedic Literature,Vol 1,fasc 1). Otto Harrassowitz, Wiesbaden; c1975.
35. Maitrāyaṇī Saṁhitā. ed. Dr.Leopold Von Schroeder, Leipzig; c1881.
36. ----------------------. ed. Satavalekar, Swadhyaya Mandala, pardi; c1942.
37. ----------------------.ed. Chowkhamba Sanskrit Pratisthana, Delhi; c2005.

38. -----------------------.ed. With Beng. Trans. by prof. prodyot kumar datta, Ramakrishna Mission Institute of Culture, Golpark; c2020.
39. Taittirīya Saṁhitā(part 1), ed.& Translated prose verse by A.B.Keith,The Harvard Oriental Series, Cambridge; c1914.